|| श्रीः ||

गीर्वाणज्योतिः मूलसंस्कृत-संहिता-ग्रन्थमाला

तृतीयं पुष्पम्

शुकनासोपदेशः

सम्पादकः

डॉ. शिवदास कुण्डलिक जाधव

गीर्वाणज्योति प्रकाशनम्

सातारा पुणे मुंबई

|| श्रीः ||

गीर्वाणज्योतिः मूलसंस्कृत-संहिता-ग्रन्थमाला

तृतीयं पुष्पम्

महाकविबाणभट्टकृतकादम्बर्यन्तर्गतः

शुकनासोपदेशः

सम्पादकः

डॉ. शिवदास कुण्डलिक जाधव

महाराष्ट्रराज्य-महाकवि-कालिदास-संस्कृतसाधना-पुरस्कारेण सम्मानितः

भूतपूर्वः संस्कृत-विभाग-प्रमुखः,

छत्रपती शिवाजी महाविद्यालयः, सातारानगरम्

गीर्वाणज्योति प्रकाशनम्

सातारा पुणे मुंबई

महाकविबाणभट्टकृतकादम्बर्यन्तर्गतः

शुकनासोपदेशः

==

सम्पादकः : **डॉ. शिवदास कुण्डलिक जाधव**

भूतपूर्वः संस्कृत-विभागप्रमुखः, छत्रपतिः शिवाजी महाविद्यालयः, सातारानगरम्

:

आवृत्तिः : प्रथमा आवृत्तिः

प्रकाशनदिनाङ्कः : ४ जानेवारी २०२२, पौष-शु.२; श्रीनृसिंहसरस्वतीजयन्ती

प्रकाशिका : **सौ. सुमित्रा जाधव**
गीर्वाणज्योति प्रकाशन
सातारा शाखा :
कारंजकर नगर, पारशी विहिरीजवळ, विलासपूर, सातारा, ४१५००१
पुणे शाखा :
एच.१०३, भास्करा सोसायटी, डीसके विश्व, धायरी, पोस्ट नांदेड, पुणे, ४११६८
मुंबई शाखा :
४/४७, उदय को-हौ. सोसायटी, आरे रोड, गोरेगांव [प.], मुंबई, ४००१०४

संपर्क : **Mobile: +919822097507**

Email : **geerwanajyotipublication@gmail.com**

Website : www.geerwanjyoti.in

© All rights of eBook reserved by Publisher.

No part of this book may be reproduced, or stored in a retrieval system, or transmitted in any form or by any means, electronic, mechanical, photocopying, recording, or otherwise, without express written permission of the publisher.

शुकनासोपदेशः।

एवं समतिक्रामत्सु केषुचित् दिवसेषु राजा चन्द्रापीडस्य यौवराज्याभिषेकं चिकीर्षुः प्रतिहारानुपकरणसम्भारसङ्ग्रहार्थमादिदेश | समुपस्थितयौवराज्याभिषेकं च तं कदाचिद् दर्शनार्थमागतमारूढविनयमपि विनिततरमिच्छञ्शुकनासः सविस्त-रमुवाच --

'तात ! चन्द्रापीड ! विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युप-देष्टव्यमस्ति | केवलञ्च निसर्गत एव अभानुभेद्यमरात्नालोकच्छेद्यमप्रदीप-प्रभानेयमतिगहनं तमो यौवनप्रभवम् | अपरिणामोपशमो दारुणो लक्ष्मीमद: | कष्टमनञ्जनवर्तिसाध्यमपरम् ऐश्वर्यतिमिरान्धत्वम् | अशिशिरोपचारहार्य्योऽति-तीव्रः दर्पदाहज्वरोष्मा | सततममूलमन्त्रशम्य विषमो विषयविषास्वादमोह: | नित्यमस्नानशौचबाध्य: बलवान् रागमलावलेप: | अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवति, इत्यत: विस्तरेणाभिधीयसे |

गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा | सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवाय: | यौव-नारम्भे च प्राय: शास्त्रजलप्रक्षालननिर्मालाऽपि कालुष्यमुपयाति बुद्धि: | अनु-ज्झितधवलापि सरागैव भवति यूनां दृष्टि: | अपहरति च वात्येव शुष्कपत्रं समु-द्भूतरजोभ्रान्तिरतिदूरम् आत्मेच्छया यौवनसमये पुरुषं कृति: | इन्द्रियहरिणहारि-णी च सततमतिदुरन्तेयम् उपभोगमृगतृष्णिका | नवयौवनकषायितात्मनश्च सलि-लानीव तान्येव विषयस्वरूपाण्यास्वाद्यमानानि मधुरतराण्यापतन्ति मनसः | नाशयति च दिङ्मोह इवोन्मार्गप्रवर्तक: पुरुषमत्यासङ्गो विषयेषु |

भवादृशा एव भवन्ति भाजनानि उपदेशानाम् | अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखेन उपदेशगुणा: | गुरुवचनमल-मपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य | इतरस्य तु करिण इव शङ्खाभरणमाननशोभासमुदयमधिकतरमुपजनयति | हरति च सकलम् अतिमलिनमाप्यन्धकारमिव दोषजातं प्रदोषसमयनिशाकर इव | गुरूपदेश: प्रशम-हेतुर्वय: परिणाम इव पलितरूपेण शिरसिजजालममलीकुर्वन् गुणरूपेण तदेव परिणमयति |

अयमेव चानास्वादितविषयरसस्य ते काल उपदेशस्य | कुसुमशर शरप्रहार जर्जरिते हि हृदये जलमिव गलत्युपदिष्टम् | अकारणञ्च भवति दुष्प्रकृतेरन्वय: श्रुतं वा विनयस्य | चन्दनप्रभवो न दहति किमनल:, किं वा प्रशमहेतुना न प्रचण्डतरीभवति वडवानलो वारिणा |

गुरूपदेशश्च नाम पुरुषाणामखिलमलप्रक्षालनक्षममजलस्नानम्, अनुपजात-पलितादिवैरूप्यमजरं वृद्धत्वम्, अनारोपितमेदोदोषं गुरूकरणम्, असुवर्णविरचनम ग्राम्यं कर्णाभरणम्, अतीत ज्योतिरालोक:, नोद्वेगकर: प्रजागर: | विशेषेण राज्ञाम् | विरला हि तेषामुपदेष्टारः | प्रतिशब्द इव राजवचनमनुगच्छति जनो भयात् | उद्दामदर्पश्वयथुस्थगित श्रवणविवराश्चोपदिश्यमानमपि ते न शृण्वन्ति | शृण्वन्तोऽपि च गजनिमीलितेनावधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून् | अहङ्कारदाहज्वरमूर्च्छान्धकारिता विह्वला हि राजप्रकृतिः, अलीकाभिमामानो-न्मादकारीणि, राज्यविषविकारतन्द्रीप्रदा राजलक्ष्मीः |

आलोकयितु तावत्-कल्याणाभिनिवेशो लक्ष्मीमेव प्रथमम् | इयं हि सुभट खड्गमण्डलोत्पलवनविभ्रम भ्रमरी लक्ष्मी: क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्,

मदिराया मदम्, कौस्तुभमणेरतिनैष्ठुर्यम्, इत्येतानि सहवासपरिचयवशाद्विरहविनोदचिह्नानि गृहीत्वेवोद्गता |

नह्येवंविधमपरम् अपरिचितमिह जगति किञ्चिदस्ति , यथेयमनार्या लब्धापि खलु दुःखेन परिपाल्यते, दृढगुणपाशसन्दान-निष्पन्दीकृतापि नश्यति | उद्दाम-दर्प-भट-सहस्रोल्लासितासिलता पञ्जर-विधृताप्यपक्रामति, मदजलदुर्दि-नान्धकार-गज-घनघटा परिपालितापि प्रपलायते | न परिचयं रक्षति, नाभिजनमी-क्षते, न रूपमालोकयते, न कुलक्रममनुवर्तते, न शीलं पश्यति, न वैदग्ध्यं गण-यति, न श्रुतमाकर्णयति, न धर्ममनुरुध्यते, न त्यागमाद्रियते, न विशेषज्ञतां विचारयति, नाचारं पालयति, न सत्यमवबुध्यते, न लक्षणं प्रमाणीकरोति |

गन्धर्वनगर लेखेव पश्यत एव नश्यति | अद्याप्यारूढमन्दरपरिवर्तावर्त-भ्रान्तिजनित-संस्कारेव परिभ्रमति | कमलिनीसञ्चरण व्यतिकार-लग्न-नलिन-नाल-कण्टकक्षतेव क्वचिदपि निर्भरमाबध्नाति पदम् | अतिप्रयत्नविधृतापि परमेश्वरगृहेषु विविध-गन्धगज-गण्ड-मधुपानमत्तेव परिस्खलति | पारुष्यमिवोपशिक्षितुमसिधारासु निवसति | विश्वरूपत्वमिव ग्रहीतामाश्रिता नारायणमूर्तिम् |

अप्रत्ययबहुला च दिवसान्त कमलमिव समुपचित मूलदण्ड-कोषमण्डलमपि मुञ्चति भूभुजम् | लतेव विटपकानध्यारोहति | गङ्गेव वसुजनन्यपि तरङ्गबुद्बुदचञ्चला | दिवसकरगतिरिव प्रकटितविविध-सङ्क्रान्तिः | पातालगुहेव तमोबहुला | हिडिम्बेव भीमसाहसैकहार्य्यहृदया | प्रावृडिवाचिरद्युतिकारिणी |

दुष्टपिशाचीव दर्शितानेकपुरुषोच्छाया स्वल्पसत्त्वमुन्मत्तीकरोति | सरस्वती-परिगृहीतमीर्ष्ययेव नालिङ्गति जनम्, गुणवन्तमपवित्रमिव न स्पृशति | उदार-सत्वममङ्गमिव न बहु मन्यते, सुजनमनिमित्तमिव न पश्यति | अभिजातमहि-मिव

लङ्घयति, शूरं कण्टकमिव परिहरति, दातारं दुःस्वप्नमिव न स्मरति, विनीतं पातकिनमिव नोपसर्पति, मनस्विनमुन्मत्तमिवोपहसति |

परस्परविरुद्धञ्चेन्द्रजालमिव दर्शयन्ति प्रकटयति जगति निजं चरितम् | तथाहि सततम् ऊष्माणमारोपयन्त्यपि जाड्यमुपजनयति | उन्नतिमादधानापि नीचस्वभावतामाविष्करोति | तोयराशिसम्भवापि तृष्णां संवर्धयति | ईश्वरतां दधानापि अशिवप्रकृतित्वमातनोति | बलोपचयमाहन्त्यपि लघिमानमापादयति | अमृतसहोदरापि कटु विपाका | विग्रहवत्यपि अप्रत्यक्षदर्शना | पुरुषोत्तमरतापि खलजनप्रिया | रेणुमयीव स्वच्छमपि कलुषीकरोति |

यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जल मलिनमेव कर्म केवलमुद्वमति | तथाहि – इयं संवर्धनवारिधारा तृष्णविषवल्लीनाम्, व्याध-गीतिरिन्द्रियमृगाणाम्, परामर्शधूमलेखा सच्चरितचित्राणाम्, विभ्रमशय्या मोहदीर्घ-निद्राणाम्, निवासजीर्णवलभी धनमदपिशाचिकानाम्, तिमिरोद्गतिः शास्त्रदृष्टीनाम् | पुरः पताकाः सर्वाविनयानाम्, उत्पत्तिनिम्नगा क्रोधावेगग्राहाणाम्, आपानभूमिः विषयमधूनाम्, सङ्गीतशाला भ्रूविकारनाट्यानाम्, आवासदरीं दोषाशीविषाणाम्, उत्सारणवेत्रलता सत्पुरुषव्यवहाराणाम्, अकालप्रावृट् गुणकलहंसकानाम्, विसर्पण-भूमिर्लोकापवादविस्फोटकानाम्, प्रस्तावना कपटनाटकस्य, कदलिका कामकरिणः, वध्यशाला साधुभावस्य, राहुजिह्वा धर्मेन्दुमण्डलस्य ।

न हि तं पश्यामि यो ह्यपरिचितयानया न निर्भरमुपगूढः, यो वा न विप्रलब्धः । नियतमियमालेख्यगतापि चलति, पुस्तमय्यपि इन्द्रजालमाचरति, उत्कीर्णापि विप्रलभते, श्रुताप्यभिसन्धत्ते, चिन्तितापि वञ्चयति ।

एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीताः विक्लवा भवन्ति राजानः, सर्वाविनयाधिष्ठानताञ्च गच्छन्ति । तथाहि, अभिषेकसमय एव चैषां

मङ्गलकलसजलैरिव प्रक्षाल्यते दाक्षिण्यम्, अग्निकार्यधूमेनेव मलिनीक्रियते हृदयम् पुरोहितकुशाग्रसम्मार्जनीभिरिवापनीयते क्षान्तिः, उष्णीष पट्टबन्धेनेवाव-च्छाद्यते जरागमनस्मरणम्, आतपत्रमण्डलेनेवापवार्यते परलोकदर्शनम् चामरपवनै-रिवापह्रियते सत्यवादिता, वेत्रदण्डैरिवोत्सार्यन्ते गुणाः, जयशब्दकलकलैरिव तिर-स्क्रियन्ते साधुवादाः, ध्वजपटपल्लवैरिव परामृश्यते यशः।

केचित् श्रम-वश-शिथिल-शकुनि-गल-पुट-चपलाभिः खद्योतोन्मेष-मुहूर्त-मनोह-राभिर्मनस्विजनगर्हिताभिः सम्पद्भिः प्रलोभ्यमानाः, धन-लव-लाभावलेप-विस्मृत-जन्मानोऽनेकदोषोपचितेन दुष्टासृजेव रागावेशेन वाध्यमानाः, विविधविषय-ग्रास-लालसैः पञ्चभिरप्यनेक-सहस्रसंख्यैरिवेन्द्रियैरायास्यमानाः, प्रकृतिचञ्चलतया लब्धप्रसरेण एकेनापि सहस्रतामिवोपगतेन मनसा आकुलीक्रियमाणा विह्वलता-मुपयान्ति।

ग्रहैरिव गृह्यन्ते, भूतैरिवाभिभूयन्ते, मन्त्रैरिवावेश्यन्ते, सत्त्वैरिवावष्टभ्यन्ते, वायुनेव विडम्ब्यन्ते, पिशाचैरिव ग्रस्यन्ते, मदनशरैमर्माहता इव मुखभङ्गसह-स्राणि कुर्वते, धनोष्मणा पच्यमाना इव विचेष्टन्ते, गाढप्रहाराहता इव अङ्गानि न धारयन्ति, कुलीरा इव तिर्यक् परिभ्रन्ति, अधर्मभग्नगतयः पङ्गव इव परेण सञ्चार्यन्ते, मृषावाद-विष-विपाक-सञ्जातमुखरोगा इवातिकृच्छ्रेण जल्पन्ति सप्तच्छद-तरव इव कुसुमरजोविकारैरासन्नवर्तिनां शिरः शूलमुत्पादयन्ति, आसन्न-मृत्यव इव बन्धुजनम् अपि नाभिजानन्ति, उत्कुपितलोचना इव तेजस्विनो नेक्षन्ते, कालदष्टा इव, महामन्त्रैरपि न प्रतिबुध्यन्ते, जातुषाभरणानीय सोष्माणं न सहन्ते, दुष्टवारणा इव महामानस्तम्भनिश्चलीकृताः न गृह्णन्त्युपदेशम्, तृष्णा-विषमूच्छिताः कनकमयमिव सर्वं पश्यन्ति, इषव इव पानवर्धिततैक्ष्ण्या परप्रेरिता विनाशयन्ति, दूरस्थितान्यपि फलानीव दण्डविक्षेपैर्महाकुलानि शातयन्ति, अकालकुसुमप्रसवा इव मनोहराकृतयोऽपि लोकविनाशहेतवः, श्मशानाग्नय इवाति-रौद्रभूतयः, तैमिरिका ईवादूरदर्शिनः, उपसृष्टा इव क्षुद्राधिष्ठितभवनाः, श्रूयमाणा अपि प्रेतपटहा

इवोद्वेजयन्ति, चिन्त्यमाना अपि महापातकाध्यवसायाइवोपद्रवमुपजनयन्ति अनुदिवसमापूर्यमाणाः पापेनेवाध्मातमूर्तयोभवन्ति, तदवस्थाश्च व्यसनशतंशरव्यतामुपगताः, वल्मीक तृणाग्रावस्थिताः जलबिन्दव इव पतितमप्यात्मानं नावगच्छन्ति।

अपरे तु स्वार्थनिष्पादनपरैर्धन-पिशित-ग्रास-गृध्रैरास्थान-नलिनीबकैः, द्यूतं विनोद इति, परदाराभिगमनं वैदग्ध्यमिति, मृगया श्रम इति, पानं विलास इति, प्रमत्तता शौर्यमिति, स्वदारपरित्यागः अव्यसनितेति, गुरुवचनावधीरणमपरप्रणेय-त्वमिति, अजितभृत्यता सुखोपसेव्यत्वमिति, नृत्य-गीत-वाद्य-वेश्याभिसक्तिः रसिक-तेति, महापरधानाकर्णनं महानुभावतेति, परिभवसहत्वं क्षमेति, स्वच्छन्दता प्रभु-त्वमिति, देवावमाननं महासत्त्वतेति, वन्दिजनख्यातिः यश इति, तरलता उत्साह इति, अविशेषज्ञता अपक्षपातित्वमिति दोषानपि गुणपक्षमध्यारोपयद्भिरन्तः स्वय-मपि विहसद्भिः प्रतारणकुशलैधुर्तैरमानुषोचिताभिः स्तुतिभिः प्रतार्यमाणा वित्तमद-मत्तचित्ता निश्चेतनतया तथैवेत्यात्मन्यारोपितालीकाभिमानाः मर्त्यधर्माणोऽपि दिव्यांशावतीर्णमिव सदैवतमिवातिमानुषम् आत्मानमुत्प्रेक्षमाणाः प्रारब्ध-दिव्योचितचेष्टानुभावाः सर्वजनस्योपहास्यतामुपयान्ति। आत्मविडम्बना-ञ्चानुजीविना जनेन क्रियमाणामभिनन्दन्ति। मनसा देवताध्यारोपणप्रतारणा सम्भूत-सम्भावनोपहताश्चान्तः प्रविष्टापरभुजद्वयमिवात्मबाहुयुगलं सम्भावयन्ति। त्वगन्तरिततृतीयलोचनं स्वललाटमाशङ्कन्ते। दर्शनप्रदानमपि अनुग्रहं गणयन्ति। दृष्टिपातमप्युपकारपक्षे स्थापयन्ति। सम्भाषणमपि संविभागमध्ये कुर्वन्ति। आज्ञामपि वरप्रदानं मन्यन्ते। स्पर्शमपि पावनमाकलयन्ति। मिथ्यामाहात्म्य-गर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न पूजयन्ति द्विजातीन्, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्, अनर्थकायासान्तरितविषयोपभोगसुखमित्युपहसन्ति विद्वज्जनम्, जरावैक्लव्यप्रल-

पितमिति पश्यन्ति वृद्धजनोपदेशम् आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय, कुप्यन्ति हितवादिने।

सर्वथा तमभिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्वन्ति, तं संवर्धयन्ति, तेन सह सुखमवतिष्ठन्ते, तस्मै ददति, तं मित्रतामुपनयन्ति, तस्य वचनं शृण्वन्ति, तत्र वर्षन्ति, तं बहु मन्यन्ते, तमाप्ततामापादयन्ति योऽहर्निशमनवरतमुपरचिता-ञ्जलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति, यो वा माहात्म्यमुद्भावयति । किं वा तेषां साम्प्रतम्, योषामतिनृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम्, अभिचारक्रियाक्रूरैकप्रकृतयः पुरोधसो गुरवः पराभिसन्धानपरा मन्त्रिण उपदेष्टारः, नरपतिसहस्रभुक्तोज्झितायां लक्ष्म्यासक्तिः मारणात्मकेषु शास्त्रेषु अभियोगः, सहजप्रेमार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः ।

तदेवंप्रायातिकुटिल-कष्ट-चेष्टा-सहस्र-दारुणे राज्यतन्त्रे, अस्मिन् महामोहान्धकारिणि च योवने, कुमार ! तथा प्रयतेथाः यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न शोच्यसे विद्वद्भिः । यथा च न प्रकाश्यसे विटैः, न प्रहस्यसे कुशलैः, नास्वाद्यसे भुजङ्गैः, नावलुप्यसे सेवकवृकैः, न वञ्च्यसे धूर्तैः, न प्रलोभ्यसे वनिताभिः, न विडम्ब्यसे लक्ष्म्या, न नर्त्यसे मदेन, नोन्मत्तीक्रियसे मदनेन, नाक्षिप्यसे विषयैः, नावकृष्यसे रागेण, नापह्रीयसे सुखेन | कामं भवान् प्रकृत्येव धीरः, पित्रा च महता प्रयत्नेन समारोपि-तसंस्कारः, तरलहृदयमप्रतिबुद्धञ्च मदयन्ति धनानि, तथापि भवद्गुणसन्तोषो मामेवं मुखरीकृतवान् ।

इदमेव च पुनः पुनरभिधीयसे –

विद्वांसमपि सचेतनमपि महासत्त्वमप्यभि-जातमपि धीरमपि प्रयत्नवन्तमपि पुरुषमियं दुर्विनीता खलीकरोति लक्ष्मीरिति सर्वथा कल्याणैः, पित्रा क्रियमाणमनुभवतु भवान् नवयौवराज्याभिषेकमङ्गलम्, कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम्, अवनमय द्विषतां शिरांसि, उन्नमय बन्धु-वर्गम् अभिषेकानन्तरञ्च

प्रारब्धदिग्विजयः परिभ्रमन् विजितामपि तव पित्रा सप्त-द्वीपभूषणां पुनर्विजयस्व वसुन्धराम् । अयञ्च ते कालः प्रतापमारोपयितुम् । प्रारू-ढप्रतापो हि राजा त्रैलोक्यदर्शीव सिद्धादेशो भवति' इत्येतावदभिधायोपशशाम ||

******

geerwanajyotiprakashan@gmail.com

गीर्वाणज्योति प्रकाशन

संस्कृत नेट/ सेट परीक्षा देणाऱ्यांसाठी सुवर्ण संधी

Subject code = 25

संस्कृत NET/ JRF/ SET

online सराव प्रश्नपत्रिका

- अभ्यासक्रमातील १० ही घटकांवर प्रश्न
- प्रश्नांची पुनरावृत्ती नाही
- प्रश्नांची तात्काळ उत्तरे
- प्रगती आलेख
- प्रतिसंच= १२ प्रश्नपत्रिका = १२०० प्रश्न
- सोडवलेली प्रश्नपत्रिका अनेकदा सोडवू शकता
- मोबाईलवर देखील प्रश्नपत्रिका सोडवू शकता

Subscribe करण्यासाठी खालील link वर click करा.

https://forms.gle/k9cEunP8ahTJXWKr5

SUBSCRIPTION FEE:

प्रति संच = रु.५००/-

एकूण ३ संच= रु.१५००/-

नमुना प्रश्नपत्रिकेसाठी खालील link वर click करा.

https://forms.gle/AHZYx35me7i1em687

पैसे भरण्यासाठी संपर्क :-

गीर्वाणज्योति प्रकाशन,
पारशी विहिरीजवळ, कारंजकरनगर,
विलासपूर, सातारा, महाराष्ट्र ४१५००१
भ्रमणध्वनी ९१+ : ९८२२०९७५०७

geerwanajyotiprakashan@oksbi

ONLINE PAYMENT:

ACCOUNT NAME – GEERWANJYOTI

ACCOUNT NO. 037004042209195001

IFSC - CSBK0000370

BANK NAME - CATHOLIC SYRIAN BANK (CSB)

BRANCH – SATARA

UPI- geerwanajyotiprakashan@oksbi

Gpay- 9822097507

UPI BHIM Paytm Accepted Here G Pay

ग्रंथ व हस्तलिखिते यांविषयी विनम्र आवाहन

ग्रंथ व हस्तलिखिते ही ज्ञानाचा खजिना आहेत, अनेक घरात बंदिस्त कपाटात हा दुर्मिळ खजिना धुळीत लोप पावत आहे. आम्ही आपणांस विनम्रपणे आवाहन करतो की, आपल्याकडे असलेले छापील व हस्तलिखित साहित्य, नियतकालिके, मासिके (जुनी,नवीन) 'संस्कृत ग्रंथालया'कडे जमा करावे. या ग्रंथालयाकडे संस्कृत वाङ्मय व संत साहित्य विषयक दुर्मिळ ग्रंथ जमा आहेत . अनेक अभ्यासक, संशोधक यांचा लाभ घेत आहेत. आपला बहुमूल्य ठेवा पुढच्या पिढीला ज्ञानासाठी मिळत राहील. तरी आपण सहकार्य करावे.ही विनंती.

इच्छुकांनी पुढील पत्त्यावर संपर्क साधावा.

गीर्वाणज्योति संस्कृत ग्रंथालय,
कारंजकरनगर, पारशी विहिरीजवळ,
विलासपूर, सातारा – ४१५ ००१
(सं.क्र. ९८२२०९७५०७)
E-mail: geerwanlib@gmail.com

गीर्वाणज्योति प्रकाशन, सातारा

1. मैत्री शुद्धलेखनाशी, प्रा.गजानन चव्हाण , डॉ.शिवदास जाधव
2. छात्र संस्कृत शब्दकोश, डॉ.शिवदास जाधव व डॉ. नीलेश जोशी
3. Experimental Psychology, Maragam
4. निवडक अप्रसिद्ध उपनिषदे, डॉ. नीलेश जोशी
5. भामिनी विलास: प्रास्ताविक – अन्योक्ति – विलास:,डॉ.शिवदास जाधव
6. सार्थ निघण्टुकोश,डॉ. नीलेश जोशी
7. विभक्त्यर्थ प्रकरण, डॉ.शिवदास जाधव, डॉ. नीलेश जोशी
8. संज्ञाप्रकरणम्, डॉ.शिवदास जाधव
9. महात्मा गांधीप्रणीत शिक्षण संकल्पना, प्रा. सुरेखा मत्सावार
10. The Glorious Symbols of India as UNESCO's World Heritag, Prof. Sandeep Dhikale
11. अभितः परितः, डॉ. सौ. प्रज्ञा शरद देशपांडे
12. अनन्तयात्रा , ज्योती पुजारी
13. अथातो ब्रह्मजिज्ञासा- डॉ. शैलजा बापट
14. साहित्यदर्पणः- प्रथम-परिच्छेदः- डॉ.शिवदास जाधव, डॉ. नीलेश जोशी
15. पाण्डुरङ्गाष्टकम् डॉ.शिवदास जाधव
16. श्रीकल्किस्तोत्रम् डॉ.शिवदास जाधव
17. श्रीगणेशन्यासः – डॉ. शिवदास जाधव
18. शुकनासोपदेशः – डॉ. शिवदास जाधव

- Contact Us:
- Geerwanjyoti Publication,
- Karanjkarnagar, Near Parashi Vihir, Vilaspur,
- Satara, Maharashtra, India. 415001
- Contact Us: Mobile: +919822097507